साप्याह पुनराक्षेपं ह्रीति पुनः शब्देन प्रसिद्धस्यैतन्माभ्यासप्रतीतेरिति भावः तावन्यान्तरे प्रयुक्त आदधीते त्याधानवाक्ये नचोद्देश्य
गतत्वात्तत्राविवक्षितेति द्वित्वमिति शंक्यं अनिर्ज्ञातोद्देश्यगतत्वेन तदसंभवादिति प्राशयः ॥ ॥पंचशरावकं॥ ॥निमित्तप्रसंग
न्नैमित्तिकं चिंतेति तत्संगतिः ईप्सितं अपेक्षितं बहुव्रीहित्योति पंचशरावाः परिमाणमस्येत्येवं बहुव्रीह्यर्थकरणद्धितार्थद्विगु
नेत्यर्थः ओदनः एवेति देवस्वदेवीपदवद्यौगिकत्वेन स्वनिहितत्वाचित्वादिति भावः पचस्यात्र पूर्वपक्षेपि पूर्वोक्तप्रयोगस्य पंच
शरावे तात्पर्यमापनेपि अन्यथोन्नरस्मैहविषे वत्सानयाकुर्यादिति पुनः करणविधानान्त्रानुष्ठाने भेदस्यत्यापि पंचशरावे सान्नाय्य
धर्माः पूर्वपक्षे सिद्धान्ते चौषधधर्मा इति प्रयोजनमभिप्राहुः ॥ ॥सप्रस्थापनेरत ॥ ॥ प्रसंगसंगतिं स्पष्टयन्नाह तद्द्वेति प्र
मायमनेन निश्चर्यते संभवतीति अन्यथोन्नरस्मैहविषे इति विधिवशात् संस्कृते आवश्यकत्वाल्लौकिके संभवतिसतीत्यर्थः त
दुपकारेण समाधानरूपोपकारेण अत्र पूर्वपक्षे पंचशरावयागस्येषे प्रधानत्वामुनरनुष्ठानं सिद्धान्ते नेति प्रयोजनं ॥ ॥वि
श्वजितु ॥ ॥आपवादिकीसंगतिः आग्रहेते उद्युक्त इत्यर्थः आग्रहपूर्वं संकल्प्येकृत्वा सत्रफलप्राप्तये इति विधीयमानस्य
फलाकांक्षाया मुपस्थितं सत्रफलमेव कल्प्यते एवं प्राप्ते व्याकरणादौ बसमाधानाकांक्षायामपि विश्वजिदेवविधीय

ते॰ नैमित्तिकत्वाच्च प्रसवापपरिहारो मुख्यं फलं सत्त्वफलमानुषंगिकम् इति तेषं॥ ॥वत्सा॥ ॥नैमित्तिकविंतापाः पादार्थ
त्वात्तद्धि न्नचिंतापा एतदुपोद्घातोत्र एतिहिकरणागतापात्र संगतिमाशंक्य निराकरोति॰ कृ इति॰ बर्हिषेति बर्हिर्लवनकालेनलक्ष्य
ते॰ व्रतं॰ निपमपूक्रमोत्र मंत्रं उपैति॰ करोति॰ वत्सैरिति वत्सापाकरणकालनलक्षणा॰ एतदेवाद्योदाहरणं॰ पूर्वत्र त्वराग्याप्रस्य
वेनपूर्वपक्षासंभवात्काललक्षणानिश्चयेन तत्सहचर्यताद्यापिसिद्धं तेषापत्यर्थमुदाहृतं॰ रागेति॰ निपमविधौ तत्र स्व
रस्यापि तदापत्तेरोविविरोधापत्तेरिति भावः॰ दूषयति॰ नेति॰ नन्वशक्यत्वादेव वत्सपदे नास्ति लक्षणा तत आह॰ विध्यंतरंचे
ति॰ अपाकर्तोः अपाकरणात॰ तेनैतदिति॰ विध्यंतरप्राप्त्यानुवादकत्वेन हेतुनाएतत्॰ बर्हिषेत्याद्यमावास्यापामिसंतमेकं
वाक्यं॰ अन्यथा तु वाक्यभेदः स्यादिति अनुवादकत्वं च पुरोडाशादेः कालविधित्व एवेत्युपोद्घातोपपत्तिरिति भावः॥ ॥कालन
क्षेत्र॥ ॥ननु चेति॰ असोमयाजिनो ग्नीषोमीयाभावे त्वेक एवाग्नेयः पुरोडाशः पूर्वोमास्यां॰ एवं च पुरोडाशद्वयोपलक्ष्य
कालान्तरकालीनो नास्तीति नोपांशुयाज इत्याशंक्य अनयापोहि कालस्य॰ न लक्षणाहि पुरोडाशो ननु विशेषणतापेनाविशिष्टः कालो
नस्यादिति दशमे वक्ष्यत इत्यर्थः॥ ॥प्रस्तरे॥ ॥संगतिं स्वयमेव वक्ष्यति॰ प्रहरणस्य शाखाप्रतिपत्तित्वं च तुर्थे उक्तमेवेति
पूर्वन्यायमाशंक्य परिहरति॰ चतुर्थे इति॰ हरतौ साहित्य मित्येतावद्वतुर्थे विचारितं॰ प्राधान्याशात्वेतदविकरणासिद्धत्व
योक्तो ननुसाधितइत्यर्थः॥ अपरावादितिसूत्रार्थमाह॰ प्रैषेति॰ पयसा मैत्रावरुणं श्रीणातीति विहितद्रव्यर्थः॰ शाखेति॰ सहत्र

देसर्थः प्रकारांतरमिति मैत्रावरुणपदं प्रपद्य तीत्यत्र यथा चतुर्थ्युक्तसंप्रदानत्वबलेनेदं तस्य प्रतिपत्तिरीष्यते तथात्र बाध
के नास्तीत्यर्थः तत्र तत्र तस्मा पाकरणादौ नकेवलं स्वहार्थबलादेव शारवा प्रतिपत्तिरुपप्रत्यक्षणावगमः किं ताकोक्ताबलादपी
त्यतोपि प्रकृतौ पादसंगतिः प्रसंगतरूपा अपवादिकी तत्तत्र ऊहः क्रमः आतिदेशिकी वानंतरसंगतिरिति पाठपदेति ॥ ॥ इति श्री
मद्दिव्यान्यतत्सर्वप्रभहात्मजवैद्यनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां षष्ठस्य चतुर्थः पादः ॥ ॥ अथ पद
ये ॥ ॥ पूर्वत्र इत्यापवारनिमित्तचिंतनमत्र तुकालापचारादिनिमित्तप्रायश्चित्तचिंतेति पादांतरता अकाल इति यत्र इत्या
मयावास्याधाःत्या धानइत्यर्थः दर्शः दर्शः हविरभिलक्ष्य पुरस्तात्पूर्वदिशि मध्यमाः सरवंशः स्थविष्ठास्त्र लो अ
त्वंशः प्रतिष्ठाः अर्थाधिकृतंशः दध्युक्त दधिचरुः तं दधिकृत्वे प्रकृतेति प्रकृता नुवादिपञ्च वशेन प्रकृतस्य इत्यस्य
तासंबंधिकर्मणाः स्थानेऽप्रकृतस्य पुरोडाशस्यैव कल्पनं गुरुभूतविशिष्टविधानं अपूर्वतनकर्मांतरविधानं चैतिदं
द्वः हविस्त्वपं तंदुत्वं दधिपयोरूपं अमावास्यायाम् पांरूपतामाभावात् पूर्वदेवतायामिति त्रेधातंदुलान्विभजेतिः
पेमध्यमाइत्यत्रमध्यमेद्विशेनाग्निप्रकृतरूपानेकविधानाभावमेदः विशिष्टविधिवाक्यभेदो विशिष्टवाक्यघनेकोद्दे
शादिदं पदाद्यनेकविधेऽसमइत्यर्थः तत्रोद्देश्यानेकत्व कृतत्वावदगते वाणाक्षिपते अन्यथा कर्मांतरविधानांगीकारे
त्रेधातं दुलानिभिम्पनयाविधानर्थक्यस्यात् हविषः पदेवता प्रकृतत्वारूपसोमानामभावेनतद्युपयोगाभावात् अतो वाक्य

मेदोगी कारणत्वपुरःकाः विशेषणत्वेकत्वकृतं तत्परिहरति· द्वात्रिंतिं· शिपयो रश्मपत्नीरता विष्टइति योगार्थः अनुहतापेतितु नयोगिकं न
वा रा नैपेक लापनीपदसमानाधिकरणतागुणमात्रवाचित्वात किंतु नक्षत्रापेतिसूचितं· एवं च विष्णुः शिपिविष्ट इत्यादि मेत्रार्थ
वादादि प्रसिद्ध्या विशेषणताविशेष्यभावावगमादिशेषता विभक्त्या विवक्षितार्थवादेकमेवकारकमित्याह· विशिष्टेति· सं
प्रतिपन्न देवताकयोः भिन्नदेवताकयोरपि सहस्रपता विधौ दृष्टं शत इति निरपेक्षा विकरणतानुवादानुपपन्नः पुनरुक्त्व
मागार्थ पृथक्करणाक्षेपाच्च गौरवं स्यादिति भावः अर्थप्राप्तेष्विति· यथा सहस्रशाखपेतिमाहिमव नातः शाखापाः प्रकृतं तां त
यात्रापितेउ, नातो द्व्यांतरेताम् सहस्रपता मिस्रकेः र्थात· द्व्यांतरस्यापि श्रपतापि प्रर्थः· एतच्च सहस्रमात्र स्य प्राम
श्रपतानुवादेन विधानमिसभिप्रायेणोक्तं· तद्द्व नानाभेदेवतांतरसंबंधान्तेपीमपि श्रपताप्राप्ते विशिष्टश्रपताविधि
पक्षे तु मुतरांच हत्वाधिकरणात्त्वपाः प्राप्तिरिति तैपं निगदर्शनमाह· एवं चेति· अकर्मांतरत्वे सतीत्यर्थः· प्रातं च नं इ
न्द्रे दधित्वसिद्ध्यर्थं दधित्वेन प्रक्षेपणस्याप्याप्तमन्यादि निरूप दर्शनमनुवादइत्यर्थः· पदीति· मां प्रपिमुखं पुरवस्यां च इ
इदेष्यतीति विधिनिपातः शंकेत· महानाव्रे चेन्द्रोदपात्रं मुपामीत प्रतीक्षेत· सापं दोहनिष्पन्नं दधि अर्थप्राप्ते पदिकर्तव्य
दर्शीर्थप द्विविला दांतच नार्थनि दृष्ट्यात अर्थ अर्थांतरनांतं च नार्थं किंतु ह्मीपारिपानपेत· एवं मतिपदिचं द्र अस्य इ
पान हातेनातं चनार्थनिहितेनार्थे नपरे घ्रमापांरा त्रावातं च्यत हिते नदध्यप्रतिपदि पुचरे तद्दर्शि कुर्यात· द्र मीमांस्या

पितेम्यचाभ्युदितेऽहं पदिनाभ्युदितपात्रदान्ये चतुर्दशीपादिनेऽप्रातरेतेनातंचनार्थानिरुक्तितेन प्राप्तस्तांभोजपोदसमर्थः अर्थाभरे
ताऽनुदर्शपाग एवेतिभावः पर्वपक्ष एतदनुपपत्तिं दर्शयति नघ्रदीति प्रतीतीनाकार्ये हविःप्रपरो आतेचनं तेनातंच्येतिविहि
तं एवं चसतिप्रक्रांतस्य दर्शोऽदृष्टवैगुण्यापादकत्वं पुनरतंचनस्य चाप्राप्तत्वाद् दृष्टस्य कल्पनेति कल्प्यनाद्यपरामिश्याहः
तच्चेति एतावदिति निपपाद्यमित्यर्थः अवचत्रेधेतिपूर्वदेवतापनयविधिरेवाकर्मांतरत्वेवीजमितितत्वं कर्मांतरत्वेतदानर्थ
क्यापत्तेः सिद्धांतेतु देवतांतरसंयोगविध्यपेक्षितापनयविधायकत्वेनार्थवत्वादतेमतिनादेवतांतरसंयोगविध्युसंभवादि
तितेपे प्रयोजनेनैलिंगदर्शनेनव्यक्ते॥ ॥उपांशुयाजे॥ ॥उक्तदेवतापनयस्यापसे आक्षिप्यसमाधातुंसंगतिः तच्चैवेति पू
र्वोदाहृतवाक्यएवेत्यर्थः कालपूर्वमिति देवतापायंचलिंगेना स्वस्यसर्वस्मै दोतिवचनेनोपांशुत्वस्यचौम्यतिवाक्येनप्राप्ते
रप्राप्तपरत्वमासीका नस्यवतिविधिता स्यर्थामिति भावः अत्राग्नेयोपौर्णमास्यं क्षिकरतावार्त्रिकसंमतिमाहः तदुक्तमिति उप
स्यत्तं दशापोपांसे अपिवापौर्णमास्यांस्यात्प्रधानशब्दसंयोगादिति सूत्रेणाभिहितं एम त्रयोदशेति ननु दशपौर्णमास्यामा
उतपोहृपंते इतिपर्वशेषः सवषट्काराहवनीया हृतिसंख्येयं पौर्णमास्यातावत्प्रधानाहुतित्रयं पंच प्रयाजास्त्वपे
नुयाजा आज्यभागद्वयं स्विष्टकृद्वेतिचतुर्दश अमावास्यायांमुपांशुयाजेभावात्त्रयोदशेति बहुचाः शांखायनाः तत्र ब्रा
स्तांच अप्ययदसंनयतपुरोडाशादतरेतोपांश्वा स्यस्यप्रतति अप्ययसंनयनसान्नाय्यस्यांतरेतोपांश्वास्यस्य

पत्नीति॰ उक्तेन्यायपत्नीवचनवाध्य इत्याशयः अपोदृष्टेति लिंगदर्शनं चावपु मानुवादइति तेषं प्रसीतां॰ देवनाम्नीने॰ ए
वेववचनवत्वा प्रारब्धा समापन दोषापिनेमा हनचेति॰॥ ॥मिह तेस्याह॥ ॥नेमि नि कुपसंगान्मि मित्र चिंतेति संगतिः॰ वि
शेषव्य इति॰ अभि शब्दो नमलक्षणा क्रिया द्वारा विशेषणीपइ त्यर्थः न तु॰ हविः॰ उद्दासीनं क्रियाविशेषतेति॰ लक्षणक सत्तिस्य क्रियपाभ्य
दपंप्रतिस्याभ्रान्यथेत्यर्थः प्रवृत्तं हविरिति॰ देवतापेसंकल्पितस्यैव हविष्का संकल्पितं निमित्त मित्यर्थादवगम्यतइत्यर्थः॥
॥अभिहृप्रे॥ ॥उपतीवकस्वरूपसंगति प्रदर्शनापाह॰ कर्मेति॰ निर्वापनिव क्षायांतु ततः प्राप्ति॰ मित्राभावाद भ्युदयेपिवे कृती
भ्युपवनिर्वापइतिसिद्धांतापेगादितिभावः॥ ॥विनिरुप्तेच॥ ॥भिरु प्तानिरु प्तप्रसंगाद धीनिरुप्तचिंतेतितिसंगतिः॰ तापवेति॰
अपनयस्यपदार्थधर्मत्वाच्च तु मुष्टिनिर्वापस्यैकपदार्थत्वेनावशिष्टमुष्टि द्वयस्यचावपववत्वान्नपूर्व देवतापनपइत्याशयः॰
निमित्ताधीनत्वा द्युपनयसंयोगयोरवशिष्टेपि प्रसंगइतिद्वितीयपक्षमाह॰ निमित्तानंतरमिति॰ तत्रोतिमिव नित्यापनयस्या
वपवेपिनकालिंतं भक्षपेदितिनिषेधव संभवादितिभावः अनुष्ठेयत्वस्संयोगोविहितफल दानादिव त्रैकदेशविषयइत्याह
विहितइति॰ सापीप्रवर्धिर्थिकं॰ अर्धनिरुप्तेव तु मुष्टीनामेकदेशस्यतापनयः कृत्स्नस्यैदेवतागुणत्वादितिसूत्रार्थः॥ ॥साम्ना
प्य॥ ॥सम्पयिनिमित्तेनैमित्तिकप्रवृत्तिः क्वचिदाक्षिप्यसमाधीयत इतिसंगतिः॰ प्रवरणादिति॰ वद्यप्यपमनुवादस्तथापित राम
द्वलादेवनैमित्तिकं संनयद्विषयंव्यवतिष्ठते॰ नगिरेतिनिषेधानुवादवत्वादितेरापदस्यगिरापदस्यानकर्म॰ सह स्वपपती ति १६

विहितद्रव्यांतरसाहित्यासंभवाद्धात्वासेनपतः सत्यभाव इति पूर्वपक्षाशयः नचेति अत्र देवतांतरविधाबुद्देश्यानां
हविषां साहित्यं न विवक्षितमित्येकोर्थः स्यच्यैव अपराविधावुद्देश्यानंद्रव्यप्रमाणानां साहित्यं नियोगतया न विवक्षितमि
त्यपरउक्तपूर्वपक्षाशयनिरासार्थः स्वकार्यप्रयुक्तयोरेव हि द्रव्ययोः साहित्यप्रसंगेन तु तद्बलेन द्रव्यप्रयुक्तिरिति तदभावेन
साहित्यविधिप्रवृत्तिरित्याशयः एवमनुवादोपि पाक्षिक एवेति॥ ॥सान्नाय्यस्थाने॥ ॥पूर्ववदित्यपि नैमि॥ ॥ ॥ ॥ ॥
त्तिकसंकोचनिराकरणाद्वाक्यं तिदेशिकीसंगतिः यदीति दीक्षितानां मध्ये कश्चिदित्यर्थः साधि अर्थानुष्ठाने उत्तिष्ठासेत यति
स्य गंतु मिच्छेत् सामस्तर्वयजमानसाधारणं अपपसृम् विमसराता सोमः पाक्षिकानुवादस्य परिहारायाह तस्मादिति प्र
दर्शनार्थं उपलक्षणं अयमपि विश्वजित्सत्रफलार्थः प्रारब्धसत्राकरणो दोषनाशार्थश्चेति हेयं॥ ॥दीक्षा॥ ॥संगति
माह नैमित्तिकेति दीक्षानिमित्ताधर्मा दीक्षितो न जुहोतीत्यादय स्तेषां शब्द नैमित्तिकाधिकारत्वाभावेपि तत्प्रसंगागतत्वं तद्
यपोगितेन च परिपालोचितं तन्मित्यर्थः प्रतिमितिः क्रविगृप्यो देयं दक्षिणाद्रव्यं चीतपाचेत्यर्थः वनुपाचन इति धानानुसारात् तं
अयुक्तमिति एकस्य प्रतिवचनस्यानुरोधेन बहूनामेकादिदीक्षापक्षाणाम् कर्षस्यान्याय्यत्वाद् एकस्य प्रतिवचनस्यैव तदेकि
मादित्याशयः पाक्षिकत्वाच्चरसाद्वाह पद्धेति प्रदर्शनार्थमिति दीक्षितस्य याचनं दीक्षाकालनपर्यंतमित्यर्थः सिद्धत्वाद्दाशय
दं लक्षणापादीक्षाकालानुवादकमित्यर्थः॥ ॥द्वादशाहस्य॥ ॥ अपवादसंगतिं सूचयन्नाह प्रकृतिवदिति अग्नौ धत्ते अ

मितो दीक्ष्यते॰ आरम्भापवर्गाभ्यां॰ दीक्षाभ्यां॰ इपं च द्वादशाहावी दीक्षितः स्यादिति वचनं नास्तीति कृत्वा चिंतेति तत्र द
र्ते॰॥ ॥पौर्णमास्यां॥ ॥कालविशेषचिंतायाः पादसंगतिमाह॰ दीक्षेति॰ पूर्ववदिहान्यापवादादातिदेशिकस्य तंत्रस्य संगति
र्ज्ञेया॰ गवामयनं नाम संवत्सरसाध्यं सत्रं॰ चित्रानक्षत्रयुक्ते पूर्णमासे चैत्र्यां॰ निर्णयदोषः॰ पूर्णमासस्य पुरस्ताच्चतुरहे एकादश्यामि
त्यर्थः तत्रस्थ द्वादशाहदिनपर्यंतं दीक्षा तदुत्तरं त्वपोदशोदिने ऽष्टम्यामेकाष्टका पद इत्यर्थः॰ चैत्री त्वन्याविशेषमाशंक्याह॰ चैत्रीति॰ तथा च
विकल्प इत्याशयः॰ अन्यत्रापि श्रौत प्रयोगात्र पूर्वो गौणत्वावधारणामत आह किं चेति॰ तत्र दोषमिति॰ आर्तवा एते संवत्सर
स्याभिदीक्षंते पदे काष्टकायां दीक्षंत इति शीतार्तिरूपदोषमपि धायेत्यर्थः॰ न वर्धा इति॰ न व्यर्थं किं वंतीत्यर्थः एतावता प्ये
काष्टकाशब्दः कथं माघकृष्णाष्टमीपरस्तत्राह॰ संवत्सरेति॰ कृतसूत्राह॰ तद्धि यत्पौर्णमीं॰ तस्मात्काकर्पांगदेवताविषय इत्यर्थः
आर्त्रमिति॰ शीतार्तिपुरःपरयास्यात्रथेति किपाविशेषणं॰ तत्रामा नौ शिशिरनामकौ ऋतू इति द्विवचनमवयव मासापि प्रापः॰ अ
त्रे प्रत्येकवाक्यतापासकल्लवाक्यार्थः॰ संवत्सरपत्नीवेनतावदेकाष्टकादीक्षापाप्रशस्तापरं वार्त्रवादिदोषात्रस्थैवीनि दु
ष्टतपा संवत्सरमुखत्वं तपाच्च प्रशस्तातते पिमा ध्येकादशी पुराणैः॰ कपसंपमैकाष्टकानुहादिति॥ ॥दीक्षाकालस्य॥ ॥
दीक्षापुरःसंगागतश्चिंतो तत्रं दीक्षानिमित्तकथं पदचिंतापूर्वोक्ताक्षिपत इत्यवसरसंगतिः॰ प्रतिष्ठिता इति॰ दीक्षितोनत्रुत
तीमादि वचनैरित्यर्थः॰ अव भ्रथ इति॰ तदंगमंत्रे दीक्षाविमोचकत्वो कैरितिभावः॰ उत्कर्ष इति॰ संध्यातः पूर्वं क्षिप मासास्पद

त्रावनुष्ठानमपि सर्थः म वेति । अत्र हरहर्दधा सायं न होतीति कालेन प्रसक्तस्य तत्रैव प्रतिषेधौचित्यात् दीक्षणीयकालानन्तरमक्षतोतिया
वः अहरहरिति वीप्सया जीवदधिकारावगमात् अग्निहोत्रेऽपि पार्वणीतत्वात्कैककार्यस्य तथा तद्वत् गमा जीवति पुरुषे विप्रसक्ते तत्
त्रैव निषेधसंभवात् अनलक्षणतापुरुषे स्यात् हरणेनेति ॥ ॥ तत्र प्रतिहोमः ॥ ॥ अग्निहोत्रं व प्रतिहोमस्यापकरणामि स्यादिति देशिकी सं
गतिः अत इति दीक्षितो न जुहोतीति शास्त्रप्रवर्तने दीक्षानुवृत्तिमूलत्वात्स्य पुरुषापराधमूलत्वाभावे तदग्निहोत्रानु
ष्ठानेऽपि प्रसक्तमपि समपि मानः प्रतिहोम इति अतिपन्नस्य होमस्य कालान्तरे प्रतिकृष्य करणं प्रतिहोमः तावताचेति दीक्षानुवृ
त्तिमात्रे तन्निषेधशास्त्रप्रवर्तनात्तावता चानधिकारादकर्तव्यत्वमपि सर्थः यथापूर्वं बाशास्त्रोपदीक्षाकालान्तःपातिनामपि तिलत्रै
कदेशार्थः ॥ ॥ प्रतिषेधश्च ॥ ॥ आतिदेशिकी संगतिः तत्रेति एतदेतिवक्ष्यमाणवचनं तु कर्मान्तरविधिपरं अन्यथोदवसा
नीयोत्तरमेव ततः प्रागिति होषत्रयापादकपरिसंख्यापत्तेरित्याशयः [illegible] थापीति दीक्षितहोमानुवादेनेष्टिकर्तुरधिकारबोध
कं वचने नकर्मान्तरविधायकं निषेध्यतया होमस्य सन्निधानादिति भावः सूत्रे आ इष्टेरिति पदच्छेदः ॥ ॥ प्रतिहोमश्चेत ॥ ॥
प्रासंगिकी संगतिः युगपदिति उपक्रिमितिक्रमेऽप्यनुष्ठानक्रमः स्यात्तन्त्रान्यथेत्यर्थः अतिपन्नानामतिपन्नक्रमेणोप
क्रितेत्तेनैव क्रमेणानुष्ठानमपि स्यादृप्वे नैवेति सायमिति तेषामहन्येवाव भ्रंशसमाप्तेरिति भावः बोउशिनो रात्राववभृथा
त्प्रातः क्रमेणेति ॥ ॥ प्रायश्चित्तं ॥ ॥ साक्षात्सामादसंगतिपाहगतमिति प्रतिहोमवत्स्वतन्त्रनिमित्ताधिकारं कोऽप्यानाद

सा॰ दी॰ नंतरसंगतिर्नेयाः सर्वत्र॰ अग्निहोत्रादिष्वपीत्यर्थः शेषिरूपोद्देश्ये आनर्थक्यपरिहारायापूर्वसाधनत्वलक्षणागावत्रापि
१८ नैतद्भावेपि नैयमिकस्य फलकल्पनागौरवपरिहारार्थं प्रकृतक्रतुसंगत्वाजन्नदन्तरोधेनार्थान्नियमित्रकस्यापीति॰ दर्शपूर्ण
मासाधिकारेऽकृतं प्रायश्चित्तं सर्वत्रस्याद्दोषतौल्यादितिसूत्रार्थः॥ ॥व्यापन्नस्य॥ ॥प्रश्नेनेति॰ प्रश्नमूलः सूत्रारं
18 भइत्यर्थः अनुगतौ प्रहरणाद्वाक्ये इतिसूत्रार्थः॥ ॥विभागश्रुतेः॥ ॥भेदनप्रायश्चित्तवदिहापि संकोचशंकोत्था
नासंगतिः बर्हिः पवमानं नद्धदेशं सर्पतां॰ गच्छतां उद्गातृप्रतिहर्तृप्रस्तोतृणां तत्रचाग्रेणालानिबद्धानेन कच्छधारी प्रति
प्रस्तोतेति॰ अपच्छेदो विभागः स च क्रियया भवतीति कर्तृकत्वेन व्यवह्रियत इति तेयं॰ सर्वेषु दंसं॰ सर्वत्वं॰ युगपदिति॰ उभ
यक्रियायान्यइत्यर्थः उभाभ्यामिति॰ यक्रियया विभागस्तस्यैतत्र कर्तृत्वमिह तूभयक्रियान्यैनैकैकस्य निरपेक्षं कर्तृ
त्वमिति निमित्तविरह इत्यर्थः स्यादेवमिति॰ अपच्छेदानुकूलक्रियायां तत्तकपत्वापपवेहि नहि तर्कत्वं यत्र स्वपत्नांतरानिर
पेक्ष एव क्रियाहेतुरिति द्वयोः निरपेक्षमेव कर्तृत्वमित्यर्थः ननूभयविशेषैकैव क्रियेतितत्र न कपलोपि पत्नांतरापे
क्ष एवेत्याशंक्याह॰ कालनमात्रे विति॰ क्रियानुमितेैव॰ तस्या एककर्तृव्याप्तित्वाभावत्वादिति भावः केचित्तु विभागभेद
मिप्रायेणाव्याचक्षते॰ एकैककर्तृकविभागस्य निमित्तत्वश्रुतेरितिसूत्रार्थः॥ ॥तत्रविप्रतिषेधात्॥ ॥उपजी राम
वकत्वसंगतिस्तच पतिः॰ यौगपद्यइति॰ प्रयोगभेदेपि कर्मैक्यात्प्रयोगान्तरे क्रियमाणे नानुपकारोपयपत्तिरित्याशयः॰ प १८

त्र हीति । निमित्तस्य प्रपुरुषमानकर्मसंबंधित्वान्नैमित्तिकानुष्ठापकत्वात् प्रयोगोपका[..]रकत्वावगमेन
प्रयोगांतरंगत्वसत्वावेरादइत्यर्थः ॥ ॥पौर्वापर्ये॥ ॥विकल्पापवादासंगतिः अनुपूर्वैतां । क्रमेतां । उभतत्रदेवेति । निर
पेक्षत्वान्निर्दुष्टत्वाच्चेति भावः बाधमानपदेवेति । विरुद्धयोरेकत्र समावेशायोगादिति भावः ननु प्रत्रस्य कुर्यत्वा
धत्वत्राह । नैनेति । मिथ्याज्ञानग्रहेतावितथापहारा द्वाध इत्यर्थः उत्तरेवैव कृतो न मिथ्याज्ञानग्रह[..]त्वत्राह । उत्तर
स्यैवेति । नाप्यमानेनैवेति । पूर्वत्र मिथ्याज्ञानग्रहपूर्वकत्वेवैसद्यमानेनेत्यर्थः अस्मात्र । गृहीतप्रामाण्यकत्वे
नास्य प्रापत्वात् । ननु उत्तरस्य प्रत्यक्षशास्त्रत्वे स्मृताववि पूर्वबाधेन तस्याः किं मानयत आह । नैमित्तिकेति । अन्य
था । पूर्वावगतपदार्थाभावनात् । तथा च पूर्वावगतविरुद्धत्वेन नैमित्तिकावगमादित्यर्थः तस्य च तदभावव्याप्यता
रूपत्वात् पूर्वाभावप्रतिषेधीकृत्य सापवर्दवसानात्सर्वबाधकत्वमिति भावः यद्यपि दृष्टान्ते सावकाशनिरवकाशत्वमधिक
मस्ति तथाप्यत्र तदभावेऽपि परत्वमविशिष्टमिति प्रमितिप्राप्यः प्रकृतिवत् प्राकृतकुशादेर्यथा नैकृतशरादयपेक्षयेति सम
न्नार्थः ॥ ॥पयुक्तता॥ ॥उपजीव्यत्वसंगतिरूचनाया । ह । पौर्वापर्य इति । तथाच्यं अंशं भवतीमनंतरं तदेतिशेषः क्रन्न
त्वभावतः क्रतुत्वरूपमात्र प्रयुक्त । निमित्तनिरपेक्षत्वादिति भावः विकल्पपक्षमाह । पूर्वास्मिन्निति । पूर्वप्रयोगे देयत्वे
न प्रसक्तत्वस्योभयत्र साम्यात् शब्दसंकोचोपक्रम इत्यर्थः बाधितमिति । पश्चाद्देनेनात्र पश्चाद्दाव्यवहितस्य देयतया

शा॰ दी॰
१९

19

प्रसक्तस्य सर्वस्वस्याभिधानं न तु तद्बाधितस्य द्वादशाहस्य प्रसक्त्यभावादिति भावः। दास्यत्रिस्यस्याबाधितदेयपर
त्वे सर्वस्वस्याप्युपादानं तस्यादिति शंकते नान्विति। बाधाभावं विवृणोति। नहीति। अदक्षिणांगत्वनिषेधस्यस्यानुवादत्वा
दिति भावः। तेन पुनर्यजेतेति पुनःप्रयोगस्तत्र पूर्ववद्दाक्षिण्यविशिष्टो विधीयत इति अर्थप्राप्तं पूर्वप्रयोगे अदाक्षिण्यप
मित्याह। किं नहीति। ननूक्तावबाधेऽपि पूर्वप्रयोगे सर्वस्वदक्षिणापाबाधस्वेष्यासंशंक्याह। पूर्वप्रयोगे चेति। देवतायां
नैमित्तिकोत्कर्षविधेः पूर्वमित्तिशेषः एतं नौत्कर्षविधेः पूर्वमबाधितं सर्वस्वमेवेति न देवोत्कृष्यते नान्यदिति भावः।
यद्येतदास्मिन्न पूर्वप्रयोग इति सूत्रार्थः॥ ॥ प्रहर्णतो॥ ॥ दक्षिणापुनःप्रयोगयोरेकविधिविधेयतया बुद्धिस्थपुन
प्रयोगविशेषत्वं तेना संगतिः। गणस्येति। द्वादशाहेन प्रजाकाममित्यत्र द्वादशाहपदेन गणाभिधानादिति भावः। अ
शादत्वादिति। पतिसमानाधिकरणस्य द्वादशाहपदस्य समूहियागवाचकत्वादिति भावः। ननु यागस्वसमुदायव्या
सक्तमित्याशंक्यामिवारयति। यागा इति। अथवा यागाः प्रत्येकमेव नतेकरणमिति शेषः। अतः प्रत्येकं साधनत्वात्। अ
नपेक्षाः सन्तः स्वांगैः समाप्नुता इत्यर्थः। अंगविधावुद्देश्यानेकत्वस्याविवक्षणादिति भावः। तर्हि प्रत्येकं फलोत्पाद
कत्वापत्तिरत आह फलमिति। फलं प्रत्युपादेयानामेकपदोपादानावगतसाहित्यस्य विवक्षितत्वादिति भावः। तदि राम
ति। दहतीत्यर्थः॥ ॥इति श्रीमद्द्विजन्मान्वयसनामचंद्रसूरिवरात्मजवैद्यनाथकृतायां शास्त्रदीपिकाव्याख्या १९

पं॰ प्रभाख्यायां षष्ठस्य पंचमः पादः॥ ॥संनिपाते॥ ॥पूर्वपादेषु प्राधान्येन प्रकृत्यधिकारश्चिंतनमपि हत्यविकृत्यधिकारश्चिंत
नेत्यादौ तरतमानंतर्यं च वेध्यमकृत्येति॰ पक्षस्य वाद्धेत्यर्थः द्वितीयप्रयाजसंनिधौ नराशंस तनूनपात्प्रयोः शाखाभेदे नाम्ना
तयोर्व्यवस्था वासिष्ठादिवाक्येन क्रियते॰ कुतः इति॰ प्रयपि नराशंसमंत्रे शौनै वैश्वामित्रविधानात्समाख्या कृतं तेवा वासिष्ठस्य त
थापि प्रथमानतया प्रयोजककर्त्तृत्वबोध्यं॰ तादर्थ्येन॰ वासिष्ठाद्यर्थत्वेन॰ बध्याः स्वामिवार्थकत्वमपरां क्ष्याह॰ षष्ठी चेति॰ संबं
धः कर्तृत्वरूपः क्वरूपकारेति॰ वासिष्ठार्थत्वेन न ऊतफलसाधनतया किं तु तत्फलसाधनकृत्रूपकारितयेत्यर्थः ननु भयथा
वाक्यार्थोपपत्तौ किं विनिगमकं तत्राह॰ एवं चेति॰ वासिष्ठार्थत्वेन नाराशंसविधौ चेत्यर्थः प्रयत्यत्र धातुरेव तत्फलसथा
पयवस्यकल्पनीयविधिप्रत्ययस्य प्रकृतिभूतधातुं विनानुपपन्नेर्नाराशंसद्वितीयं प्रयजेदितिवाक्यपर्यवसानाद्युक्ता
प र्थोपपत्तिः एवं कार्यैकाध्याहारेऽपि सामान्यवाचकस्य कृञः प्रयाजएव पर्यवसानान्नानुपपत्तिरिति बोध्यं॥ ॥वचनात्
॥ ॥अपवादिकीसंगतिः॰ एतेनेति॰ कुतापाख्येनाहीनेनेत्यर्थः सापूर्त्यं नाम्नैककालप्रसंबंधित्वमैहिकं फलं॰ पृथगपदि
ति॰ एकैकेन पदेन पृथगपत्तरधिकरणे॰ अभिधेये वर्गे द्वंद्वइत्यर्थः अन्यथा परस्परान्वयसामर्थ्याभावेन समासा
नुपपत्तेरिति भावः तदर्थस्यैवेति॰ समासार्थस्य रातसंबंधिपुरुषस्यैवेत्यर्थः पुरोहितपदादिति॰ समासाद्वि
तं च नेष्यत्वबहितपुरोहितपदैकशेषमात्रे तोपपत्तौ नसमुदायैकशेषकल्पनं युक्तमिति भावः पद्वेतिपक्ष

हृषपतिः किंचेति यद्यपि वरतोः संख्यार्पितयोरुद्देश्यत्वं तथापि व तेन पुरोहिते नेष्टं भावयेदिति नियोगविधानु
पादेयत्वाद्रुपस्थितैकत्वं तत्र विवक्षितमिति भावः प्रथमेति द्वितीये त्वेकसंबंधित्वबोधायत्तसार्थक्यमिति
भावः अपवादादितिसेयं युगपदधिकरणतारूपेत्वाद्रुपयादाचेति महाभाष्य एव निरासादित्यर्थः भिन्नक
न्यपोरेवेति यद्यपि नाराशंसस्य मानकन्यस्य पुरोहितस्यानिसंभवत्तथापि सो प्रपक्त्न च प्रसादि भिन्न
कन्यतापा आचरयकत्वमिति भावः ॥ एतेनैव वचनादेकस्य रानो द्विसंयोगः पुरोहितद्वयसंबंधः तस्या
द्वचनादेवाहि एकस्य पुंसः अंतरिहोमेस व्यापस्य यो पारिकार्यकरत्वमिति द्वितीयपत्रं पक्षार्थक
म॥ ॥सव्यारि॥ ॥अत्रापवादिकीसंगतिः भिन्नकन्यनिरासात् उत्तरोपोद्घातसमापदेयं पक्षं
दैनेतिप्राधान्यस्याप्युपलक्षणता कालिजांकर्मा हिंसंतरकैकाः पदार्था इत्यर्थः ननु प्रकृतितो ब्राह्मणराकर्तृक
स्याहिं सेप्राप्तेयं जमानसंस्कारत्वेपि नरराजन्यादिप्राप्तिरत आह प्रधानेति प्रकृतौ ब्राह्मणस्य स्यगृताभूत कर्तृपरि
च्छेदेनांग त्वादिह प्रयोजनमभावेन यथाप्राकृतकार्यत्वे न च गृताभूतकर्तृद्वारस्याभावेन न प्राप्तिरित्यर्थः स्वामिनां य
जमानानां आर्त्विज्यमेवविति अनुवादेन लक्षणापायकत्वादिति भावः अन्येति यजमानभिन्नेत्यर्थः जड्डेति ब्राह्मणवि
वयतपाचरितार्थस्यक्रह्विकामपदस्यनातिदेशबाधकतायुक्तेत्यर्थः॥ ॥ वासिष्ठानां॥ ॥एवं तत्रैव विशेषविचा

20

रासंगतिरितिस्वचनापाहः ब्राह्मणानामपीति। अविरोधादिति। प्रकृतौ वासिष्ठो ब्रह्मा वैश्वामित्रो होतेति वचना
द्विरोधात्सर्वेषां वासिष्ठत्वसमकल्पानां चविकल्पेनाधिकार इत्यर्थः। सत्रो ऽत्रमापाततो द्वितीयपक्षमाह वासिष्ठ इति।
सिद्धांतमाह। यएवेति। एतदर्थवादवशेन वसिष्ठगतवासिष्ठपदस्य रूपेण पदवत्स्य आरोपात् रश्मिरसीत्यादि मंत्ररूपत्वो
पभागाधेतृपरत्वेन तस्यैव ब्रह्मत्वस्यानुपपत्त्या तानान्त्र्य वासिष्ठमिपमाभाव इत्यर्थः। भाष्ये तु यएव कश्चित्स्तो
मभागानधीयीत स एव ब्रह्मा भवेदिति विधिवाक्यमुदाहृतं। वासिष्ठो ब्रह्मेति च तदर्थवाद इत्युक्तं॥ ॥विहारस्य
॥ ॥प्रासंगिकी संगतिः। परार्थत्वादिति। ऋत्वर्थत्वादित्यर्थः। पवमानसंस्कारार्थत्वे हि सर्वेषां संस्कारसिध्यर्थं त
दपेक्षा स्यात्ततु नदस्तीति भावः। इष्टिपूर्वकत्वेति। एतच्चाग्निष्टोमपूर्वकत्वस्याप्युपलक्षणं। दर्शपूर्णमासाभ्यामिष्ट्वा
सोमेन यजेतेत्यनेनेष्टिपूर्वकत्वत्समानकर्तृकत्वयोरंगत्वावगमादनाहिताग्नेर्न तत्संभव इत्यर्थः। नन्विष्टिपूर्वक
त्वत्समानकर्तृकत्वयोर्वकिंचिदाहिताग्निनाप्युपपत्तेर्न सर्वेषामाहिताग्निताभिप्राय इत्यत आह। आधानेति।
अग्निसंस्काररूपफलस्याधानगामित्वाभावादाहः कर्मेति। विहारस्याग्नित्रयस्यापदीपस्याप्यन्यकार्यप्रयुक्तत्वास
मर्थत्वादनग्नीनामपि सत्रे स्यादिति सूत्रार्थः॥ ॥ऋत्विग्दानं॥ ॥आत्मनेपदानुपपत्तिहेतुप्रसूदाहरणात्संगतिः।
द्विगतिर्मरतां। विगृह्णा इति। अन्यस्य जीवतः पात्रसंभवे पितदीपानुपपत्त्यादि प्रतीक्षापाप्रयोगप्रारम्भात्संगा

पत्निरिति भावः नु कादीनामग्निवत्स्त्रीपान एवाप्रयुक्तत्वाघप्याकाम्यापि किंचित्स्यात्तैः कर्तृप्रतीपे नेति सूत्रार्थः॥
॥ पुरुषकल्पेन॥ ॥ एवं सविशेषञ्चास्मरणाधिकारश्चिंतानंतरं वैरूप्याधिकारश्चिंतेनेति संगतिः दर्शयति। वैरूप्योद्देशेनापूर्व
सामदर्श्यति धीपांचदर्श्यवाधापत्तेरिति भावः तस्मात्प्रकरणानुग्रहं वैरूप्यनिमित्तत्वादिति। वैरूप्यसंबंधिनसाम
दर्श्यतिधीयते। संवं चन्द्र वैरूप्याधिकारिकदर्शपूर्णमाससंबंधिसामिधेनीपरिच्छेदकत्वमिमर्थाद्वैरूप्यस्यनिमित्त
त्वमिति भावः। वैरूप्यरूपपुरुषकल्पेन सामदर्श्येन विकृताववरकल्याद्वैरूप्यकर्तृनियमः स्याद तस्यावरकल्या
दे। सामदर्श्यगुणत्वादितरान्प्रतिसामदर्श्याभावादेकस्मिन्नैरूप्य एवाधिकारः स्यात समदर्शो वैरूप इति लिंगाच्च। इत्या
विकारवद्वैरूप्यत्तो मारव्यप्रागवदिति सूत्रार्थः॥ ॥ इति श्रीमन्नत्संह्वशावातेस्य श्रीरामचंद्रसूरिविरचितायां वैघनाथ
कृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां षष्ठस्याध्यायस्य षष्ठः पादः॥ ॥ स्वदाने॥ ॥ इत्थं कर्तृचिंतानंतरं दाते
राधिकारश्चिंत्यते। अत्र नु तद्विश्वोगद्वाराचिंत्यत इति पादभेदः। नत्रेति। आदिनाक्षनादिसंग्रहः सर्वेषामिति। आत्मी
यत्वेन तात्पादीनां सर्वेषां स्वशब्दवाच्यत्वादिस्यर्थः ननु स्वत्वत्यागेन परस्वत्वापादनात्मकदानस्य कथं तात्पादौ सं
भवस्तत्राह। शक्यंते चेति। परविधेयाः पराधीनाः शिशवो वचारणे। ननु स्वत्वत्यागोऽपीत्यर्थः कन्यादानादि विध्यनु
सारेणातस्य दानं तिवाच्यत्वायोगात्कचिद्दानादौ तस्याधिकत्वादिति भावः स्वत्वत्यागं विनापरस्वत्वापादनेपि दा

राम
२१

नव्यवहाराभावाप्रतिग्रहीतुः परस्वोपभोगदोषापत्तेश्च स्वत्वस्यागोपिदानस्यार्थः स्वत्वे च धनादौ निमित्ताधीनत्वात्स्व
दार्थान्तरं पित्रादौ तत्स्वाभाविकत्वासिद्धत्वादि कल्पेत. अत एव न कन्यादाने न मयेति प्रागानुष्ठानं शिष्टानां. तेन तत्र दानाति
गौणा एव न मुख्य इत्याशयेनाह नैतदिति. एवं च स्वशब्दस्यात्मीयपरत्वेऽपि दानातिवशेन संकोच इत्याह पत्न्यादीति. वक्तृतक
नात्मीयत्वेन ज्ञातिधनादिसाधारणी एकादशाङ्गिरनामीयेऽपि धनादौ प्रयोगादतो न स्वकृदुज्ञारतो सर्वपरता किं तु दानाति
वशेन धनपरतैवेत्याह किं चेति. ॥ ॥ न भूमिः स्यात्॥ ॥ आतिदेशिकी संगतिः गृहभूम्यादिषु तत्र स्तुतष स्वत्वस्य दानावि
धिवशेन निरिपात्तघावर्तनापात्तये पथिति. धनपिति. कटग्रहणास्वामित्वव्यवहारयोर्दर्शनादिति भावः. न नगनत्ताका
ष्ठाद्दैपरिग्रहमात्रेणास्वत्वप्रतिपादकस्मृतिविरोधान्नराज्ञः स्वत्वमित्याह नेति. कथं तर्हि स्वामित्वापरपर्यायं राज्ञा मत
आह राज्ञं हीति. कंटकश्चौराद्याः भतिलेन. प्रस्कपकारित्वेन. एतत्प्रयुक्त एव स्वामित्वव्यवहारोपीत्याह. एतावतामिति
पंडुनाधिपेयप्येवमित्याह पोइलिकश्चेति॥ ॥ अकार्यत्वात्॥ ॥ इह त्वत्वाद्दक्षिणादानमिति प्रमवत्का नासंगतिः केस
राशिस्कंधत्लोमानितद्दतोऽश्वादौ निमित्तः अपि विश्वादि दाराधिकत्वं. वाक्यभेदपरिहाराय केसरिव्यतिरिक्तं सर्वं स्व
दहातीति पर्युदासेन दानविधिशेषत्वमित्यर्थः. अश्वादिदानस्याकार्यत्वात्तत्र इतरधनादिविशेष इति सूत्रार्थः॥ ॥ नियमा
त्॥ ॥ आतिदेशिकी संगतिः कृष्णेति. स्ववरीरजतेकृष्णं. ततमित्रेण माणिमुक्तादि अकृष्णं. एवं च सर्वविधधनदानस्ये

शा॰ दी॰
२२
22

वक्तुरसंगत्वाद्विद्यमानमपि संपाद्य देयमित्यर्थः इतेति । सर्वशब्दस्य प्रकृतपरत्वादिति भावः दानविधिमिति । दाना
नुवादेन सर्वस्वविधौ तु यस्य दानप्रसक्तिस्तस्य सर्वता विधिरविद्यमानस्य दानप्रसक्त्यभावान्न संपादनमित्याशयः
अतएवात्र यस्य पदस्त्वीति । ननु सर्वशब्दबलात् सर्वविधधनवत एवाधिकारोऽस्त्वित्याशंक्याह किंचेति । सर्वशब्दो हि प
रमसर्ववचनः प्रकृतसर्ववचनो वा स्यात् न तु सर्वविधवचनः प्रमाणाभावात् एवं च परमसर्ववचनत्वस्य प्रकृते नाशं
क्यत्वात् प्रकृतवचनत्वमेवोचितमिति भावः दानस्यानित्यत्वादनित्यैरपि नीयैर्नसंबंध इति सूत्रार्थः ॥ ॥सूद्रश्च ॥ ॥
इत्याप्यातिदेशिकी संगतिः धर्मार्थमिति । धर्मशिक्षार्थं सेवारूपस्य धर्माचरणार्थं वेत्यर्थः दासस्त्विति । क्रीतदासो
वेत्यर्थः नैवनिर्गीर्णकस्येवाधमर्णस्य शास्त्रयस्मिन् प्रहृत्वं सततथा तस्य भाव इति सूत्रार्थः ॥ ॥दक्षिणाकाले ॥ ॥संग
तिः पूर्ववत् तरोषस्य षष्ठ दानसंयोगाद्दानयोग्यत्वादिति सो च हेत्वर्थः ॥ ॥अशेषत्वात् ॥ ॥अथातिदेशिकी संगतिः इह
विति । विश्वजितीत्यर्थः शिष्टाकोपाधिकरणोक्तप्रयेयत्वबलाबलन्यायेन प्रत्यक्षदृष्टाणापूर्वकृद्धितीयपक्षमुपा
पयति । प्रधानत्वादिति । लाघवेनेति । सर्वत्वविशिष्टद्रव्यविधययेक्षयादेयद्रव्ये सर्वत्वमात्रविधौ लाघवमित्यर्थः
अशेषत्वात्सर्वदानेऽवशिष्टत्वात् द्रव्यस्य तदंतमेव कर्म । तस्य द्रव्यसाध्यत्वादिति सूत्रार्थः ॥ ॥अपहग शप
णो ॥ ॥अत्र सर्वस्वदक्षिणा आक्षिप्य समाधीयत इति संगतिः अपि वृत्त इति । एतन्यायमूलोति गौणत्वपुः आ २२

पुनर्गौरिति रिक्थे वंरूप इत्यर्थः पशुकामो यजेतेनपञ्जेते निपत्रतिशिखवराणां दहीनकं विध्यंत इति कर्तव्यता प्राबल्या
दिति॥ श्रुतेनानलक्षणागम्यत्वेनानुकामो यजेतेनपतेते मानिकादृलवत्वादिमर्थः प्राप्तिमात्रेति॥ ननु तदनुष्ठानवत्त्वम्
तिमात्रशकार्थः कुतस्तत्राह प्राप्तमिति॥ अहर्गणेष्वविद्यमानो विश्वजित्तद्धर्मी सर्वस्वदानवत्त्वात्सर्वेषां विश्वजिता
मविशेषादिति सूत्रार्थः॥ ॥विकारः॥ ॥सर्वस्वेन द्वादशशतवाधः किमुतेति विशेषचिंतनादनंतरसंगतिः प्रकृतितो
द्वादशशताधिकस्यैव पक्षप्राप्तस्य नियमना नित्यत्व नदानुरधिकारइत्याह इदंविति॥ विकारेद्वादशशतस्थानापन्नः
सर्वस्वदानरूपः सन्नुभयतः स्यूनेऽधिके च स्याद्विशेषादिति सूत्रार्थः॥ ॥अपरिमाणे॥ ॥सर्वस्वतदुक्तसंख्याधि
कमेव अपरिमितमिति वक्ष्यमाणातिदेशोपोद्घातोयम्॥ ततइति॥ परिमाणशून्यद्रव्यस्य दानाक्षेपादेव प्राप्तत्वाद
प्राप्तस्य चाभावस्याविधेयत्वादुक्तपर्यवसानतेतालाइति॥ वदसमर्थसमासांगीकारेणानञः क्रियासंबंधादुक्तपरिमा
णाप्रतिषेधोपमितिभावः संख्यातदेति षडादिमितसंख्येत्यर्थः अपरिमाणोऽपरिमितवाक्ये शिष्टस्यैकादेर्वासंख्या
तत्प्रतिषेध इति सूत्रार्थः॥ ॥अनियमः॥ ॥सुगममेतत॥ ॥परकृति॥ ॥अत्रविधिस्तापवादाः संगतिः बहुस्त
त्रामावाशिरोहस्तिगोत्रामे मदर्थे वादमात्रं अर्थवादमात्रे पूर्वपक्षस्यो इंबराधिकरणेनैव निरासात्कथं चिंतेत्य
त आह कृत्वेति॥ वापि कर्त्रकवेति॥ स्तुतिसंबंधाविनएवतत्क्रन्य्यविधिविषयमौचित्यादिति भावः तथाचेष्टिकर्तृ

शा·दी·
२३

ह्यृत्विग्गोत्रसंस्कारकत्वेन माषपाकनिषिद्ध इत्यर्थः ऋत्विक्कर्तृकत्वस्य माषपाकत्वावकत्वेनत्वस्य त्वामावात्त्ववि
धिविषयत्वमित्याह मैवमिति· अर्थवादोवेति· तद्वत्तथानकुर्यादारत्यपमेत्वाश्नीयादिति निषेध इत्यर्थः एककर्तृकत्वमुपा
ख्यानेपरकृतिः अनेककर्तृकं तमुराकल्यः पथोन्मुक्तं हि स्मपूर्वं समानतन्त्रम्पुरिमादि· तन्मनुष्यधर्मो विधिः स्यादि
पतो नुक्तो नेनमन्त्रोपपूर्वो अनापेतिसूत्रार्थः॥ ॥सत्रहत्वसंवत्सरं॥ ॥अत्र मनुष्यधर्मत्वस्यापनादपवादिकोसंग
तिः पंचेति· अत्र पंचाशेच्छब्दः संख्यापरः संख्येयपरत्वे तत्रपंचतान्वयानुपपत्तेः त्रिंशच्चत्रिंशस्तोमकत्वं तृहन्निपरः सं
वत्सरशब्दोपि तत्साध्यक्रतुवृत्तिपरः तथाच ताहशक्रतुवृत्तिः पंचत्वसंख्यावच्छिन्ना पंचाशत्संख्येतिपर्यवसितोर्थः कुन्तक
ल्प इति· पित्रार्थं तमुच्चादिभिः समापनोयमित्यर्थः अर्धनतीयंरात्रं तेषुताहशानामर्धाधिकहिः शतसंख्याकानामित्यर्थः
एवं चपंचपंचाशत इतिपतमानपदमिति माननः अथोसंभवादिति वाक्यनिष्ठपेनतथाविधापुः कन्यानानुपपन्नेत्यर्थः प्र
तिमेति· संवत्सरसदृशानत्संवत्सराभिका इतिप्रतीतेरित्यर्थः अहरुपन्त इति· पद्मपितस्तोमस्वाभिधेयत्वद्विष्टंत्वहर्न्नक्षत्रा
योच्यते तथापिप्रयोगप्राचुर्याद्दृढ्निरूढत्वक्षरगात संघातेनुनेतितात्पर्यं॥ ॥इति श्रीमत्सद्रामचंद्रसूरिवरात्मजवै
द्यनाथकृतायांशास्त्रदीपिकाव्याख्यायां प्रभाख्यायां षष्ठस्य सप्तमः पादः॥ ॥इष्टिपूर्वत्वात्॥ ॥इत्याहिताग्न्यादेरधिका राम
रापवादः प्राधान्येनार्चिं स्येत इति पाठभेदः संतीति· पृथिवी होता· द्यौरध्वर्युः रुद्रोग्नीत्· बृहस्पतिरुपवक्तेति चतुर्होतृमंत्रः २३

23

उभयपाक्षिकात्वाद् इयमनंतरमुभयत्रेति शेषः तस्मादिति निर्धारणाभावादुभयविधवचनव्यत्ययात्त्रयाणामिदमर्थः इ
दं चानिर्धारणाम् अनुपपन्नोक्तं वक्तृतस्त्वनुवादानर्थक्यादप्राप्तार्थत्वाद्विधिरेवैष सूत्रे वचनव्यक्तिरित्याशयः एवं
वानाहिताग्नेर्विधानादाहिताग्नेश्चानिषेधादुभयाधिकारत्वमितिताम् अर्थम् नार्थप्राप्तमिति वैदिककर्मणामाहवनी
यसाध्यत्वादर्थादाहिताग्नेः प्राप्तिः प्रसक्तस्य वचनेन त्वनाहितेऽग्नेः प्राप्तौ नसास्संभवतीत्यर्थः अक्तन्तु शेषः पुरुषार्थो होमः
अपूर्वोपि दर्विहोमत्वात्तु कृतिरहितोपि संस्कृते लौकिकेग्नौ भवेत्स्यात् कुतः इष्टिपूर्वकत्वादाहवनीयादेः सर्वहोमांगत्वेनाव
गते विधिविनानुदयमभवात्तथा आधानस्याग्निद्वारा सर्वहोमशेषत्वादिति सूत्रार्थः ॥ ॥ उपनयनं ॥ ॥ प्रसङ्गाहरणा
संगतिं स्वयपत्नीह · पूर्ववदिति · अनाहिताग्न्यधिकारबोधकवचनाभावादित्यर्थः मातावकाग्नाविति · आचार्याग्नौ कि
ममाता नाम आधानगतत्वमनेयपदविरोधेन मातावकार्य्यत्वायोगादिति भावः स्मृतिनिरोधाशंकामपरिहरति · यावितिः
कर्मार्थी अपत्यार्थी चेति द्वैराटिक्यपेतत्वोत्पायां यानां नोत्तरत्वविधिनर्थापायामित्यर्थः कर्मविधिर्विधाप्रपृक्तिरस्तीति क
र्वाचिंतयापूर्वपक्षे तद्दूषणेनेनपरिहरति · आधानस्येति · कृत्वा चिंतायामप्याह · किंचेति · दारक्रियापाहिवाक्योपा
त्तभार्यार्थी एकेन · भार्यान्तुपरिगणकर्मणा नेकार्थेति स्यादेव कान्नबाध इत्यर्थः ॥ ॥ स्वपतीष्टिः ॥ ॥ आधानास
परूपपूर्वमिष्ठान्तत्वे तु प्रसूतहरणासंगतिः न तु स्वविधिप्रयुक्तस्यैवाधानस्य ग्रहणात् कथं निवादस्यापात प्र

पुक्रिरतरश्चाहः वनीयमित्यादि दाक्यानुसारेऽश्च स त्यपीतिः येषामाधानविधिरस्ति तेषां कर्ममिर प्रपुक्तावपितिषादे
क्यात स्रुपुक्रि पुंक्ते पाराप : पदेति : दिवा हवनीयमित्यादि वाक्यानुसारेणाधानमात्रं तन्यस्याहवनीयस्यावगमे हि नि
पादेनापि ससंपादयितुं शक्येतवसंते ब्राह्मणोऽग्नीनादधीतेत्यादि प्रश्न विधिविहिताधानसंस्कृतस्याहवनीयपदार्थ:त्व
कथमत्रैव शीक कृते नाधाने नस्यादिति नाधानाश्रेपइ त्यर्थः ॥ ॥अवकीर्णि ॥ ॥ आतिदेशिकी प्रसङ्गाहरत्ता
चुसंगतिः अवकिरेत ब्रह्मचर्ये भ्रंशयेत मैथुनमाचरेदिति यावतः लौकिकेति : श्रौतस्याग्न्यभावे होमस्य
लौकिकाग्नावाचारादित्यर्थः आपस्तम्बेन तन्मु होमइ त्युक्तं ॥ ॥उदगयन ॥ ॥ब्रह्मचर्य प्रसंगासंगातिः पूर्व
पक्षः शुक्लपक्षः पुरायं पक्ष इत्यादिरहितम हः : स्मृतिः पुसिद्धा : तूपेन तु एतद्वै देवानेतु पंप इदगयनमिति तत्र वेन
नत्येतिः पूर्वाह्णो वै देवानामित्यन्यार्थस्य तत्समर्थस्य वाक्यशेषस्य दर्शनं ॥ ॥ इतरे षिति सूत्रं स्पष्टार्थम् ॥ ॥पा
श्रौ ॥ ॥पूर्ववदिहापि विपमातिदेशासंगतिः तत्रेति : पाश्चात्रुपरां हि सामर्थ्यतूपलिंगवशेन द्रव्याभावे
निमित्तेऽत्र प्रयोगमितितिमित्त वतस्वतत्राधिकाराइति भावः स्यादेवमितिः अव घातादिवत्केवलं दृष्टार्थत्वा
भावान्नियमादृष्टसि द्ध्यर्थं नियम व देवानुष्ठानमित्यर्थः नैमित्तिकत्वं तु प्रमाणाभावादसिद्धमेवेति भावः ॥ ॥ राम
तथा ॥ ॥आतिदेशिकी संगतिः मापुं : मापुरादः पन्यस्य मौपुमकृतौ रोवापद्विराहतः अग्निमीतस्मादेत सोवि २४

अग्न्यंशं चरुं तं नमस्य इति मंत्रः संग्रामे हते परशौ होमस्य समर्थः निमित्तं दृष्टप्रयोजनं ॥ ॥ अनर्थकमितिसूत्रं ॥ ॥पदच्चोद
नायां ॥ ॥ अनर्थकं विस्फारितापभाषवादसंगतिः वाक्यभेद इति मंत्रादिवाक्यवादिसमर्थः अत्राधिकरणान्तरं वै
षम्यपरत्वेन श्लोकं व्याचष्टे विधीति नन्वग्रागपदेनमेवानर्थक्यपरिहाराय विधिगतपदस्य विशेषपरत्वेस्याद
त आह मंत्रस्त्विति ज्ञाते समूहं निगमेति छिदे गंमे अग्रागशब्दप्रमाणाच्छिन्नागमनवलक्षणपयोगार्थं नाभेनेसमर्थः
रूढिर्वाधित पोगार्थसंभवादाह पदावेति सामाप्रितः पर्यासमाप्तः तंमंत्रे तादृशं निमलनगाडे गत्वैनावगतः गरुत्मानस्वो
पकारित्वेनं वाकुर्वन्तः कास्यभोजिन्यायेनेति भावः विधत्त इति एतन्मंत्रप्रकाशितेपशुमालभतेति प्रयोगविधि
तरोनैकवाक्यतासंपर्यवसानादिति भावः एतदध्यायार्थोपसंहारपूर्वकमतिदेशादिविचारस्योपदेशोपजीवक
त्वात्तदानंतर्यं शिष्यहितार्थमाह अधिकृतिरितिः इतिः एवंप्रकारेण अधिकृमानविचारेण पमाणानुसर्वापेक्षि
तं प्रधानं चेसमर्थादेवगम्यमानत्वान्न निर्दिष्टमित्तिशिवम्॥ ॥इति श्रीमत्पदवाक्यप्रमाणाभिज्ञ श्रीमन्नसिंहपचं
ाननवैद्यनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां षष्ठोध्यायः संपूर्णः॥ ॥श्रीकृष्णायनमः॥ ॥श्री[illegible]मा
पनमः॥ ॥श्रीलक्ष्मीनाथसमर्पणं॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥